## केन्द्रीयविद्यालय संगठनम्-चेन्नै संभागः

## द्वितीयपूर्वपरीक्षा 2025-26

## प्रश्नपत्रम्

## संस्कृतम् (सम्प्रेषणात्मकम्) (कोड्-संख्या -119)

**कक्षा- दशमी** **समयः - 3 होराः**

**पूर्णाङ्काः -80**

**सामान्यनिर्देशाः**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 14 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।

| | | |
|---|---|---|
| 'क' भागः | अपठितावबोधनम्: | 10 अङ्काः |
| 'ख' भागः | रचनात्मककार्यम्: | 15 अङ्काः |
| 'ग' भागः: | अनुप्रयुक्तव्याकरणम्: | 25 अङ्काः |
| 'घ' भागः | पठितावबोधनम्: | 30 अङ्काः |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्ङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### "क" भागः

### अपठित - अवबोधनम् (10 अङ्काः )

**1.अधोलिखितम् अनुच्छेदं पठित्वा प्रदतानां प्रश्नानाम् उतराणि लिखत-**

आधुनिके युगे मानवजीवने प्रदूषणम् इति एका महती समस्या अस्ति । कुत्रापि स्वच्छः वायुः, स्वच्छं जलं, स्वच्छानि खाद्यपदार्थानि न प्राप्यन्ते। यन्त्रालयानां यानानां च धूमेण सम्पूर्णं वायुमण्डलम् दूषितं सञ्जातम् ।

दूषितवायुना विविधाः श्वासरोगाः जनान् पीडयन्ति । औद्योगिकक्षेत्राणां विकासाय वृक्षाणां विनाशं कृत्वा जनाः प्रकृतिदेवीमपि संपीडयन्ति । ध्वनिविस्तारकयन्त्रस्य अधिकाधिकप्रयोगेन ध्वनिप्रदूषणं जायते |प्लास्टिकमपि अधुना प्रदूषणं द्विगुणयति| प्लास्टिकानि तु मृत्तिकायां लयं न प्राप्नुवन्ति | तानि सर्वदा सर्वत्र प्रकृतिं पर्यावरणञ्च नाशयन्ति | अग्निना दह्यन्ते चेदपि श्वास-विषये कठिनतां रोगं च जनयन्ति | अस्मात् बहुविधप्रदूषणात् एव कुत्रचित् अतिवृष्टिः कुत्रचित् च अनावृष्टिः भवति । अनेन धनस्य जनस्य च क्षतिः भवति । अतः अस्माभिः सर्वैः सह मिलित्वा प्रदूषण समस्यायाः समाधानम् कर्तव्यम् ||

**(क) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=1**

i. आधुनिके युगे कस्य महती समस्या अस्ति ?

ii. केन श्वासरोगाः भवन्ति ?

iii.अस्माभिः कैः सह मिलित्वा प्रदूषण समस्यायाः समाधानम् कर्तव्यम् ?

**(ख) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x2=4**

i. सम्पूर्ण वायुमण्डलं केन दूषितं सञ्जातम् ?

ii.जनाः प्रकृतिदेवीं कथं संपीडयन्ति?

iii. कस्मात् कारणात् अतिवृष्टिः भवति ?

**(ग) गद्यांशस्य कृते उपयुक्तं शीर्षकं लिखत । 1**

**(घ) निर्देशानुसारम् उत्तरत- 3x1=3**

i) . 'हानिः' इत्यर्थे गद्यांशे किं पदम् लिखितम् ?

(क) विनाशं (ख) क्षतिः

(ग) वृष्टिः (घ)अनावृष्टिः

ii) 'समस्या' इति विशेष्यपदस्य कृते किम् विशेषणपदम् प्रयुक्तम् ?

(क) महती (ख) प्रदूषणस्य

(ग) अस्ति (घ) वायुः

iii. 'कुर्वन्ति' इति क्रियापदस्य कृते कर्तृपदं किम्?

(क) विनाशं (ख) वृक्षाणां

(ग) जनाः (घ) सर्वैः

**"ख" भागः**

**रचनात्मकं कार्यम् (15 अङ्काः)**

**2. भवान् दीपकः । दिल्लीनगरे छात्रावासे स्थित्वा अध्ययनं करोति । पितरं प्रति धनं प्रेषणविषये लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत- 10x1/2 = 5**

छात्रावासः

(i)..........

दिनांकः ...................

पूजनीयाः पितृचरणाः

(ii)...........................।

अत्र कुशलम् तत्रास्तु इति भगवन्तम् (iii)................ प्रार्थयामि । यद्यपि अत्र छात्रावासे सर्वं सुव्यवस्थितम् अस्ति, तथापि (iv)................. सान्निध्यस्य अभावः अस्ति । परीक्षाकालः समुपस्थितः, तदर्थं कानिचित् पुस्तकानि (v).............. इच्छामि। यदि कष्टकरं न भवेत् तर्हि पञ्चशतम् (vi).............. अविलम्बं प्रेषयन्तु। (vii) ................. अभावे अहं मित्राणां (viii).................. च सहायतया कार्यं सम्पादयामि। मात्रे मम (ix)........................... निवेदनीयाः । गृहे सर्वेभ्यः यथायोग्यं नमः । (x).. ...............यथाशीघ्रं प्रदातव्यम् ।

भवदात्मजः,

दीपकः ।

मञ्जूषा

| |
|---|
| रूप्यकाणि, क्रेतुम्, धनस्य, अहर्निशम् , नमोनमः , भवताम् , पुस्तकालयस्य, प्रणामाः, पत्रोत्तरम्, दिल्लीतः, |

**3. अधः प्रदतं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्च वाक्यानि संस्कृतेन लिखत -** **1x5=5**



| |
|---|
| उद्यानम्, बालः, खेलतः, बाला करोति, पश्यति, वृक्षः, चित्रम्, रचयति, उपविशति, दोलायाम्, रचयति , मेघाः , पुष्पाणि , |

**अथवा**

**मञ्जूषायाः पदानि चित्वा "भारतीय सेना" इत्यस्य विषयस्य उपरि संस्कृतभाषायाम् अनुच्छेदं लिखत-**

**"भारतीय सेना"**

**मञ्जूषा-**

| |
|---|
| कठिनं जीवनं, सेनायाः उपरि गर्वम्, वर्तते, कठिनपरिस्थित्याम् अपि, कार्यम् , करोति, हिमालयस्य, हिमाच्छादितेषु शिखरेषु, अहर्निशं सेवामहे, इति उद्घोषं सार्थकं, कुर्वन्ति । |

**4. अ) रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** **1x5=5**

**राधा-** मोहिनि ! किमर्थं चिन्तिता इव प्रतीयसे ?

**मोहिनी**- i.................... |कस्मिन् विद्यालये प्रवेशं कारयामि इति चिन्ता ?

**राधा**- अस्माकं ग्रामे एव सर्वोदयः विद्यालयः वर्तते ।

ii.......................

**मोहिनी**- एतत् कथं सम्भवम्? Iii..........................

**राधा**- विशेषविद्यालयः ? न न, भगिनि ! सर्वकारस्य योजना अस्ति- सर्वे विद्यार्थिनः सहैव अध्ययनं कुर्वन्तु इति ।

**मोहिनी**- धन्यवादाः भगिनि ! महतीं चिन्ताम् अपसारितवती भवती ।

**राधा**- iv................. सर्वे विद्यार्थिनः सर्वेषाम् आवश्यकताम् अवबुध्य परस्परं साहाय्यं कुर्वन्तु ।

**मोहिनी**- किमेतत् सत्यम् ? v......................?

**राधा**- अथ किम्?

| |
|---|
| समावेशिशिक्षायाः उद्देश्यमस्ति\| |
| मम पुत्रः राकेशः अन्यथासमर्थः अस्ति\| |
| तत्रैव प्रवेशं कारयतु\| |
| एतादृशेभ्यः छात्रेभ्यः विशेषविद्यालयस्य आवश्यकता भवति\| |
| किं राकेशः अपि सामान्यबालकैः सह पठितुं शक्नोति? |

**अथवा**

**आ) अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

एकस्मिन् उपवने स्थिताः आम्रवृक्षाः परस्परं i.........कुर्वन्तः वदन्ति यत् मनुष्याः तेषां पक्वानि ii.................... त्रोटयित्वा नयन्ति परन्तु कृतज्ञतया एकं अपि iii......... तान् प्रति नैव कथयन्ति । अहो! तेषाम् इमां iv ......... धिक् धिक् । 'वृक्षाणाम् समीपम् निःसरन्' कश्चित् v............ तेषां इमां वार्तां श्रुतवान् किञ्चित्। तत्र

vi............च तान्  अब्रवीत् -  'अस्मिन् भवदभ्यः कृतज्ञतायाः vii.................. का वार्ता? भवतां स्वभावः viii................. एव। पुनः भवन्तः ix...................... अतिप्रसिद्धाः  इति कथयित्वा सः x................ प्रस्थितः |

| प्रकाशनस्य, अग्रे, फलानि, कृतघ्नतां, परोपकारविषये , स्थित्वा, वार्तालापं, शब्दं, पथिकः, फलोत्पादनम्। |
|---|

**"ग" भागः**

**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)**

**5. (अ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं/सन्धिच्छेदं वा कुरुत- 1x4=4**

i) **उत् + दण्डः** बालकः अवदत् |

ii) अतिदूरं **किञ्चिद्** दुर्गमवनं प्रविष्टः भवेत्

iii) **लोकेऽस्मिन्** बहवः विद्वांसः भवन्ति |

iv) **गै + अकः** प्रसिद्धं गीतं गायति |

**अथवा**

**(आ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं/सन्धिच्छेदं वा कुरुत-**

i) पापिनां च **सदैव** दुःखं भवति ।

ii) सः तु परिवारस्य **नयनम्** अस्ति ।

iii) प्रथमं **अनु + छेदः** पठनीयः |

iv) **कार्यक्रमः + तु** सुनिश्चितः |

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यःचित्वा लिखत- 1×4=4**

(i) **राजादेशं** श्रुत्वा सर्वे भयत्रस्ताः ।

(क) राज्ञः आदेशं (ख) राज्ञा आदेशः

(ग) राज्ञे आदेशः (घ) राजा आदेश

(ii) सर्वेषामपि महत्त्वं विद्यते **समयम् अनतिक्रम्य।**

(क) समयम् यथा (ख) यथासमयम्

(ग) समयानुसारम् (घ) यथासमयः

(iii) तच्छ्रुत्वा परद्रव्ये **अनासक्ता** सा न्यवेदयत ।

(क) आसक्ता न भविष्यति (ख) न आसक्ता

(ग) आसक्ता न (घ) आसक्ता न भवति

(vi) ततः प्रविशतः **व्यासनारदौ** |

(क) व्यासः नारदः (ख) व्यासौ नारदौ च

(ग) व्यासः नारदौ च (घ) व्यासः च नारदः च

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- 1x4=4**

(i) ईटा हि यस्यास्ति **पुर+ ङीप्** प्रधाना।

(क) पुरा (ख) पुरः

(ग) पुरी (घ) पूर्णा

(ii) अस्मिन् अवसरे **समाज्+ठक्** कार्यं क्रियते ।

(क) सामाजिकम् (ख) सामाजिकः

(ग) सामाजिकी (घ) सामाजिका

(iii) **अवक्रता** यथा चित्ते तथा वाचि भवेत्।

(क) अवक्र+टाप् (ख) अवक्र+तल्

(ग) अवक्र+ङीप् (घ) अवक्र+त्व

(iv) अहं **भाग्यवान्** अस्मि ।

(क) भाग्य + मान् (ख) भाग्य + मतुप्

(ग) भाग्य + टाप् (घ) भाग्य + वान्

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोदत्तं संवादं पुनः लिखत - 1x3=3**

**गायत्री**- सन्ध्ये ! किं.... .......... ओदनं पचसि ?

**सन्ध्या** - आम् ! मया ओदनं ----------

**गायत्री** - तदनन्तरं त्वं किं करिष्यसि ?

**सन्ध्या** - तदनन्तरम्.. .............गीता पठ्यते ।

**गायत्री** - अहमपि गीताम् प्रतिदिनं पठामि ।

**मञ्जूषा**

| |
|---|
| पच्यते, मया, त्वम् |

**अथवा**

**(आ) वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनःलिखत-**

(i) लता- रमे! त्वं कुत्र........ (गम्) ?

(ii) रमा- ............ (अस्मद्) कुत्र अपि न गच्छामि |

(iii) लता- किं त्वया ................(प्रदर्शनी) न दृश्यते ।

**9. कालबोधशब्दैः अधोलिखितं रिक्तस्थानानि पूरयत। 1x3=3**

(i) विकासः प्रातः ..........9:30 वादने विद्यालयं गच्छति ।

(ii) सः नित्यं............7:15 वादने भ्रमणाय गच्छति ।

(iii) देवदत्तः रात्रौ...........9:45 वादने वार्ताः श्रृणोति ।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पुरयत - 1x4=4**

(i) अहं पश्यामि यद् वृद्धाः तु.............चलन्ति ।

(ii) सः.....................एव अत्र आगच्छत् ।

(iii) धनं विना .............सुखम् ?

(iv)...............एकं विशालम् उपवनम् अस्ति ।

**मञ्जूषा -**

| |
|---|
| शनैः, कुतः, ह्यः, अत्र |

**11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत-** **1x3=3**

(i) **<u>अभीष्टं</u>** वस्तूनि प्राप्य याचकाः सन्तुष्टाः आसन् ।

(क) अभीष्टः (ख) अभीष्टा

ग) अभीष्टानि घ) अभीष्टौ

(ii) त्वं नर्तनात् अन्यत् किम् अपरं **<u>जानाति</u>** ?

(क) जानन्ति (ख) जानन्ति

(ग) जानामि (घ) जानासि

(iii) प्रबुद्धौ **<u>सः</u>** दम्पती आश्चर्येण अतिष्ठताम्।

(क) सा (ख) तौ

(ग) ताः (घ) तानि

**'घ' भागः**

**पठितावबोधनम् (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्गुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः। अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्-भो भो बालकाः। कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित्

उद्दण्डः बालकः उवाच-अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम्?

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

(i) प्रच्छन्नभाग्यः कुत्र निवसति स्म?

(ii) मार्गः कीदृशः आसीत् ?

(iii) बाल्ये वयसि सः केन सह चौर्यकर्मणि निरतः जातः ?

**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) तौ बालकान् प्रेक्ष्य किमवदत् ?

(ii) उद्दण्डः बालकः किम्उवाच ?

(iii) सः प्रच्छन्नभाग्यः किमर्थं ग्रामान्तरं प्रस्थितः ?

**इ. अ) निर्देशानुसारम् उत्तरत -** **2x1=2**

(i) "श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः" - अत्र क्रियापदं किं प्रयुक्तम् ?

(ii) 'उद्दण्डः बालकः' अत्र विशेषणपदं किम् ?

**अथवा**

**(आ) निर्देशानुसारम् उत्तरत** -

(i) 'स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्'- अत्र क्रियापदं किम् ?

(ii) 'सन्मार्गम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

**13. अधोलिखितं पद्यांशे पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी ॥

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **2x ½ = 1**

(i) छाया कीदृशी भवति ?

(ii) मधुरभाषिणी का भवति ?

(iii) प्रथमः धीगुणः कः अस्ति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **2x 1 = 2**

(i) कीदृशं सलिलम् अपि पुरुषं न प्रह्लादयति ?

(ii) पुरुषं का प्रह्लादयति ?

(iii) धीगुणाः के भवन्ति ?

**III. (अ) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -** **2x1=2**

(i). 'आनन्दयति' इत्यर्थे किं पदं प्रयुक्तम् ?

(ii). 'शीतला छाया' इति अनयोः पदयोः विशेषणपदं किम् ?

**अथवा**

**(आ) निर्देशानुसारम् उत्तरत -**

(i) 'श्रोतुम् इच्छा' इति स्थाने किं पदं प्रयुक्तम् ?

(ii) "मिथ्याज्ञानम्" पदस्य विलोमपदं श्लोके किं भवति ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**<u>बकः</u>** - (प्रविश्य, स्वपक्षौ अवधूय) कथं माम् अपि अधिक्षिपसि? किं ते महत्वम् ? वर्षतौ तु मानसं पलायसे। अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि | कीदृशी तव मैत्री? आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि ? वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञ इव तिष्ठामि | दुग्धधवला मे पक्षाः | न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूरं राष्ट्र- पक्षी इति मन्यन्ते। अहमेव योग्य: ।

**<u>मयूरः</u>** - (प्रविश्य साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया

भक्षयसि। धिक् त्वाम् । अवमानितं खलु सर्वं पक्षिकुलं त्वया।

**<u>काकः</u>** - रे सर्पभक्षकः नर्तनात् अन्यत् किम् अपरं जानासि ?

**<u>मयूरः-</u>** श्रूयतां श्रूयताम्। मम नृत्यं तु प्रकृतेः आराधना । पश्य। चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम् । मम केकारवं श्रुत्वा कोकिलः अपि लज्जते| मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः ।

**I. एकपदेन उत्तरत (केवलं प्रश्न्नद्वयम् )** 2x ½=1

(i) कः स्वपक्षौ अवधूय प्रविशति ?

(ii) कः वृष्टेः अभिनन्दनं करोति ?

(iii) केन मयूरः पक्षिराजः कृतः ?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** 2x1 =2

(i) जनाः कं "राष्ट्र-पक्षी 'इति मन्यन्ते ?

(ii) केषां अपूर्वं सौन्दर्यम् ?

(iii) बकः मौनं धृत्वा किं करोति ?

**III. (अ) भाषिक कार्यम्** - 2x 1 =2

(i) “अहम् एव वृष्टेः अभिनन्दनं करोमि” अस्मिन् वाक्ये क्रियापदं किम् ?

(ii) "परित्यज्य" इत्यस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

**अथवा**

**(आ) निर्देशानुसारम् उत्तरत -**

(i) ‘जले’ इत्यस्य विशेषणम् किम् ?

ii) “अनृतम्’ इति पदस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत ।

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत 5X1=5**

(i) पाठकस्य **<u>षट्</u>** गुणाः सन्ति ।

(ii) सूपकारेण मेषः **<u>अर्धज्वलितकाष्ठेन</u>** ताडितः ।

(iii) कामस्य नाशाय **<u>इन्द्रियाणि</u>** वशे करणीयानि ।

(iv) **<u>अस्मिन् संसारे</u>** कश्चिदपि त्वया सदृशः नास्ति ।

(v) प्रच्छन्नभाग्यस्य गृहं **<u>मणीनाम्</u>** आभया भासमानम् अभवत् ।

**16. (अ) मञ्जूषातः पदानि चित्वा अधोलिखित लोकस्य अन्वयं पूरयित्व पुनः लिखत-** **4x ½ = 2**

**<u>श्लोकः</u>** - शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं सः युक्तः स सुखी नरः ॥

**<u>अन्वयः</u>** - यः (i) ........... प्राक् कामक्रोधोद्भवम् (ii) ......... इह एव (iii)............. शक्नोति सः नरः (iv)........... सः सुखी (भवति)।

**मञ्जूषा**

| |
|---|
| सोढुम्, युक्तः, वेगम्, शरीरविमोक्षणात् |

**अथवा**

**(आ)मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**

**<u>श्लोकः</u>** - मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः ।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः ॥

**<u>भावार्थः</u>** -(i).......... एतादृशाणि मित्राणि अपि (ii). .......... इति कथ्यन्ते ये मित्राणां हितकराणि (iii)................परित्यज्य विपरीतं (iv)............ ।

**मञ्जूषा**

| |
|---|
| रिपवः, सेवन्ते, वाक्यानि, विद्वद्भिः |

**17. रेखाङ्कितानां पदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - 1x4=4**

(i) राज्ञः दानशीलताम् **<u>आकर्ण्य</u>** जनाः तं देशम् आयान्ति स्म।

क) श्रुत्वा ख) मत्वा

ग) प्राप्य घ) सन्तोषः

(ii) **<u>सकलं</u>** जगत् ध्वस्तं भविष्यति ।

क) समस्तम् ख) ईश्वरीयम्

ग) अर्थम् घ) वैद्यः

(iii) स विवेक इति **<u>ईरितः</u>।**

क) दृष्टः ख) कथितः

ग) श्रुतः (घ) दुःखम्

(iv) प्रश्नोत्तरमाध्यमेन भवतां **<u>जिज्ञासां</u>** शमयितुम् इच्छामि।

क) गन्तुम् इच्छा ख) ज्ञातुम् इच्छाम्

ग) गातुम् इच्छा (घ) मार्गः

**18. मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत - 4 x ½ = 2**

एकदा भगवान् बोधिसत्त्वः (1). ............राजा अभवत्। सः महान् दानी, विनयशीलः, वृद्धोपसेवी च (ii).............। तस्य दानशीलताम् श्रुत्वा (iii). ......... देशेभ्योऽपि जनाः तस्य देशम् आयान्ति स्म। एकदा शक्रः अपि तस्य (iv) ... ........परीक्षितुम् आगच्छत्। सः नेत्रहीनयाचकरूपेण आगत्य तं राजानम् एकं (v). ....... अयाचत। राजा तस्मै चक्षुर्द्वयमेव प्रायच्छत् | प्रसन्नः (vi) ......कतिपयेभ्यः दिनेभ्यः पश्चात्पुनः राज्ञः पुरतः उपस्थितः अभवत्। सः राज्ञः त्यागवृत्तिं प्रशंसन् नेत्रद्वयमपि प्रत्यारोपयत् | अपि च शतयोजनपर्यन्तं ( vii)........पारम् अपि द्रष्टुं समर्थः भव इति तस्मै वरम् अयच्छत्। उच्यते अपि- नास्ति त्यागसमं (viii)....... ।

| |
|---|
| आसीत्, शिवीनाम्, सुखम्, शैलानाम्, अन्येभ्यः, दानशीलताम्, शक्रः, नेत्रम्। |

**********************************